# CTET / TET Exam - Sanskrit Important Questions

# संस्कृत के महत्वपूर्ण प्रश्न

| | |
|---|---|
| 1. | "अष्टाध्यायी" इत्यस्य ग्रन्थस्य रचनाकारः कः?<br>उत्तर- पाणिनिः |
| 2. | अष्टाध्याय्यां कति अध्यायाः ?<br>उत्तर- अष्टौ |
| 3. | अष्टाध्याय्यां कति पादाः ?<br>उत्तर- ३२ |
| 4. | सिद्धान्तकौमुदी इत्यस्य रचयिता क: ?<br>उत्तर- भट्टोजिदीक्षित:। |
| 5. | बालमनोरमाटीकाया: कर्ता क: ?<br>उत्तर- वासुदेवदीक्षित:। |
| 6. | तत्त्वबोधिनीव्याख्याया: कर्ता क: ?<br>उत्तर- श्रीज्ञानेन्द्रसरस्वती । |
| 7. | प्रक्रियाकौमुदी इत्यस्य ग्रन्थस्य कर्त्ता कः ?<br>उत्तर- रामचन्द्रः |
| 8. | अष्टाध्याय्यां प्रत्याहारसूत्राणि कति ?<br>उत्तर- चतुर्दश। |
| 9. | प्रत्याहारसूत्रेषु कोऽयं वर्ण: द्विरनुबध्यते ?<br>उत्तर- णकार:। |
| 10. | प्रत्याहारसूत्रेषु कोऽयं वर्ण: द्विरुपदिष्ट: ?<br>उत्तर- हकार:। |
| 11. | किमर्थमुपदिष्टानि प्रत्याहारसूत्राणि ?<br>उत्तर- अणादिप्रत्याहारसंज्ञार्थानि। |
| 12. | वेदपुरुषस्य मुखात्मकं वेदाङ्गं किम् ?<br>उत्तर- व्याकरणम् । |

Careerdost

| | | |
|---|---|---|
| 13. | हकारादिषु अकार: किमर्थम् ?<br>उत्तर- उच्चारणार्थ:। | |
| 14. | सूत्राणां प्रकाराः कति ? के ते ?<br>उत्तर- सप्त- संज्ञा,परिभाषा, विधि:, नियम:, निषेधः, अतिदेश:,अधिकार:। | |
| 15. | व्याकरणस्य कति सम्प्रदायाः सन्ति ?<br>उत्तर- अष्टौ । | |
| 16. | किं नाम संज्ञासूत्रम् ?<br>उत्तर- संज्ञासंज्ञिसम्बन्धबोधकं सूत्रम् । | |
| 17. | किं नाम परिभाषात्वम् ?<br>उत्तर- अनियमे नियमकारिणीत्वम् । | |
| 18. | किं नाम विधिसूत्रम् ?<br>उत्तर- आगम-आदेशादिविधायकं सूत्रम् । | |
| 19. | सम्प्रति व्याकरणस्य प्रतिनिधिग्रन्थः कः ?<br>उत्तर- शब्दानुशासनम् । | |
| 20. | को नाम नियम: ?<br>उत्तर- सिद्धे सति आरभ्यमाण: विधि: नियम: । | |
| 21. | को नाम अतिदेश: ?<br>उत्तर- अविद्यमानस्य धर्मस्य विद्यमानत्वकल्पनम् । | |
| 22. | किं नाम अधिकारत्वम् ?<br>उत्तर- स्वदेशेफलशून्यत्वे सति उत्तरत्र फलजनकत्वम् । | |
| 23. | अष्टाध्याय्याः प्रथमसूत्रं किम् ?<br>उत्तर- वृद्धिरादैच् । | |
| 24. | अन्त्यहलाम् इत्संज्ञाविधायकं सूत्रं किम् ?<br>उत्तर- हलन्त्यम् (१.३.३) | |
| 25. | अनुनासिकाचाम् इत्संज्ञाविधायकं सूत्रं किम् ?<br>उत्तर- उपदेशेऽजनुनासिक इत् (१.३.२) | |
| 26. | आदिरन्त्येन सहेता (१.१.७१) इति सूत्रेण किं विधीयते ?<br>उत्तर- प्रत्याहारसंज्ञा । | |

Careerdost

| | | |
|---|---|---|
| 27. | प्रत्याहारेषु इतामग्रहणे किं प्रमानम् ?<br>उत्तर- अनुनासिक इत्यादिनिर्देश:। | |
| 28. | कस्य ह्रस्व: , दीर्घ:, प्लुत: इति संज्ञा ?<br>उत्तर- एकमात्राकालिकस्य अच: ह्रस्व: इति, द्विमात्राकालिकस्याच: दीर्घ: इति, त्रिमात्राकालिकस्य अच: प्लुत: इति संज्ञा। | |
| 29. | अनुनासिकसंज्ञासूत्रम् किम् ?<br>उत्तर- मुखनासिकावचनोऽनुनासिक:(१.१.८)। | |
| 30. | अकारस्य कति भेदा: ?<br>उत्तर- अष्टादश । | |
| 31. | लृवर्णस्य क: भेद: नास्ति ?<br>उत्तर- दीर्घ: । | |
| 32. | एचां क: भेद: नास्ति ?<br>उत्तर- ह्रस्व: । | |
| 33. | सवर्णसंज्ञासूत्रं किम् ?<br>उत्तर- तुल्यास्यप्रयत्नं सवर्णम् (१.१.९) । | |
| 34. | कण्ठस्थानं केषां वर्णानाम् ?<br>उत्तर- अकुहविसर्जनीयानाम् । | |
| 35. | तालुस्थाने के के वर्णा: निष्पद्यन्ते ?<br>उत्तर- इचुयशा:। (इ,ई,च्,छ्,ज्,झ्,ञ्,य्,श्) | |
| 36. | केषां वर्णानाम् उत्पत्तिस्थानं मूर्धा ?<br>उत्तर- ऋटुरषाणाम् । | |
| 37. | लृतुलसा: कुत्र निष्पद्यन्ते ?<br>उत्तर- दन्तेषु । | |
| 38. | उपूपधमानीयानाम् उत्पत्तिस्थानं किम् ?<br>उत्तर- ओष्ठौ। | |
| 39. | ञमङणनानां क: अधिक: गुण: ?<br>उत्तर- नासिका । | |

Careerdost

| | |
|---|---|
| 40. | वकारस्य निस्पत्तिस्थानं किम् ?<br>उत्तर- दन्तोष्ठम् । |
| 41. | अनुस्वार: क्व निष्पद्यते ?<br>उत्तर- नासिकायाम् । |
| 42. | प्रयत्न: कतिविध: ?<br>उत्तर- द्विविध: । |
| 43. | तौ प्रयत्नौ कौ ?<br>उत्तर- आभ्यन्तर:, बाह्य: । |
| 44. | आभ्यन्तर: कतिविध: ?<br>उत्तर- पञ्चविधः । |
| 45. | ते आभ्यन्तरा: के ?<br>उत्तर- स्पृष्टम् , ईषत्-स्पृष्टम् , विवृतम् , ईषत्-विवृतम् , संवृतम् च । |
| 46. | स्पृष्टप्रयत्न: केषां वर्णानाम् ?<br>उत्तर- स्पर्शानाम्। |
| 47. | ईषत्स्पृष्टं केषां वर्णानाम् ?<br>उत्तर- अन्त:स्थानाम्। |
| 48. | केषां वर्णानां विवृतप्रयत्न: ?<br>उत्तर- ऊष्माणां स्वराणाञ्च । |
| 49. | कस्य संवृतम् ?<br>उत्तर- ह्रस्वस्य अकारस्य प्रयोगे संवृतम्। |
| 50. | विवृतस्य अकारस्य संवृतत्वं केन सूत्रेण विधीयते ?<br>उत्तर- अ अ (८.४.६७) |
| 51. | पूर्वत्रासिद्धं (८.२.१) कीदृशं सूत्रम् ?<br>उत्तर- अधिकारसूत्रम् । |
| 52. | यमो नाम क: ?<br>उत्तर- वर्गेषु आद्यानां चतुर्णां पञ्चमे वर्णे परे पूर्व सदृश: कश्चिद् वर्ण: " यम:" भवति। |
| 53. | स्पर्शवर्णा: के ?<br>उत्तर- ककारादारभ्य मकारपर्यन्तम्। (कादयो मावसानाः । |

Careerdost

| | |
|---|---|
| 54. | अन्त:स्था: के ?<br>उत्तर- य्, र्, ल्, व् । |
| 55. | ऊष्माण: के ?<br>उत्तर- श्, ष्, स्, ह् । |
| 56. | स्वरा: के ?<br>उत्तर- अच: । |
| 57. | को नाम जिह्वामूलीय: ?<br>उत्तर- ॅ क ॅ ख इति कखाभ्यां प्राग् अर्धविसर्गसदृश: । |
| 58. | उपध्मानीयो नाम क: ?<br>उत्तर- ॅ प ॅ फ इति पफाभ्यां प्राग् अर्धविसर्गसदृश: । |
| 59. | सवर्णग्राहकं सूत्रं किम् ?<br>उत्तर- अणुदित्सवर्णस्य चाप्रत्यय:(१.१.६८) |
| 60. | बाह्यप्रयत्ना: कति ?<br>उत्तर- एकादश । |

Careerdost